योऽयं पौनर्भवादीनां राज्यनियोजनाभावः स औरसव्यतिरिक्ताभाव एव "अभावे पूर्वपूर्वेषामित्यस्यैवानेनापवादात् सत्यौरसे तु राज्याभावस्य "न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत्। पितॄणां साधयेन्नित्यमौरसे तनये सतीत्यनेन" प्रागेवाभिधानात्। सत्यौरसे क्षेत्रजादीन् राज्ये नैवाभिषेचयेत् पितॄणां नित्यं श्राद्धादि च नैव साधयेत् न कारयेदित्यर्थः। गोत्रेणेति यद्यपि जातकर्म्मादीनां साक्षाद्गोत्रस्य करणता न श्रूयते तथापि तदङ्गभूते वृद्धिश्राद्धे तत्सम्बन्धावश्यम्भावात् प्रधानेऽपि तत्सम्बन्ध इति। चूड़ादिषु साक्षादेव तत्सम्बन्धः। "शिखा अपि च कर्त्तव्याः कुमारस्यार्षसङ्ख्ययेति" स्मरणात्। संस्कारैः पुत्रत्वमित्युक्तम् तानेवान्वयव्यतिरेकाभ्यामाह पितुर्गोत्रेणेति। यः पुत्र आचूड़ान्तं चूड़ान्तैः संस्कारैः पितुर्जनकस्य गोत्रेण संस्कृतः सोऽन्यतोऽन्यस्य पुत्रतां न याति। अयमत्राभिसन्धिः। कृतचूड़स्य परिग्रहीतुः पुत्रताभावप्रतिपादनम् असाधारणपुत्रतां विषयीकरोतीत्यवश्यं वाच्यम्। अन्यथा गृहीत्वा पञ्चवर्षीयमित्यनेन कृतचूड़स्यापि परिग्रहीतृपुत्रताप्रतिपादनविरोधात्। गृहीत्वेत्यस्य च कृतचूड़विषयत्वावश्यम्भावः स्पष्टमिष्यते ततश्च चूड़ान्तसंस्कृतस्य परिग्रहे द्व्यामुष्यायणता भवति गोत्रद्वयेन संस्कृतत्वात् तस्य च फलं गोत्रद्वयसम्बन्ध इत्यग्रे वक्ष्यते। अनेन जातकर्म्मादीनां चूड़ान्तानां संस्काराणां पुत्रताहेतुत्वमुक्तम्। आचूड़मिति वक्तव्ये यदन्तग्रहणं तदकृतार्षसमसङ्ख्यशिखस्य पुत्रीकरणाभ्यनुज्ञानार्थं प्रधाननिष्पत्त्या पुत्रताहेतुत्वात् चूड़ाद्या इति वक्ष्यमाणत्वाच्च। अकृतजातकर्म्माद्यसम्भवे कथमित्यत आह चूड़ाद्या यदीति। यदि चूड़ाद्याः संस्कारा निजगोत्रेण प्रतिग्रहीतृगोत्रेण कृता वैशब्दोऽवधारणे तदैव दत्ताद्यास्तनयाः स्युरन्यथा ते दासा उच्यन्ते इति। चूड़ा आद्या येषां ते तथेति न तु चूड़ाया आद्या इति पूर्वेण पौनरुक्त्यापातात्। अनेन जातकर्म्माद्यन्नप्राशनान्तानां जनकगोत्रेणानुष्ठानेऽपि न विरोधः। तथा च अकृतजातकर्म्मादिर्मुख्यः अकृतचूड़ोऽनुकल्प इति सिद्ध्यति। दत्ताद्या इत्यादिपदेन कृत्रिमादिग्रहणमित्युक्तमेव तेषामपि संस्कारैरेव पुत्रत्वं न परिग्रहमात्रेण अन्यथा दास उच्यत इति विपक्षबाधकात्। अन्यथा चूड़ाद्यकरणे कृतचूड़ादिपरिग्रहे वा दासता भवति न तु पुत्रत्वमित्यर्थः अस्य पुत्रत्वस्य यूपत्वादिवत् संस्कारजन्यत्वात्। असंस्कृतः पुत्रीकार्य्य इति स्थितम् तत्रावध्यपेक्षायामाह ऊर्द्ध्वमिति। असंस्कृतोऽपि पञ्चमादूर्द्ध्वं न ग्राह्यः कालाभावेन पुत्रत्वानुपपत्तेः। अनेन पञ्चैव वर्षाणि पुत्रपरिग्रहकाला इत्युक्तं भवति तद्व्यतिरेकेणाभिधानन्तु पञ्चमानन्तरं गौणोऽपि कालो नास्तीति प्रतिपादनाय। अन्यथा "स्वकालादुत्तरः कालो गौणः सर्व्वः प्रकीर्त्तित" इति न्यायेन पञ्चमानन्तरस्य गौणकालत्वापत्तिः। ततश्च जननमारभ्यातृतीयवर्षं, तत्रापि तृतीयवर्षस्य मुख्यकालता ऊर्द्ध्वन्तु पञ्चमाद्वर्षादित्युपसंहारे वर्षश्रवणाच्च अत्रापि चूड़ाशब्दस्य तृतीयवर्षपरतैवाभिप्रेतेति गम्यते। अन्यथा उपनीतिसहभावपक्षे अष्टमवर्षस्याकृतचूड़स्य परिग्रहापत्तिः। नचेष्टापत्तिः "ऊर्द्ध्वन्तु पञ्चमाद्वर्षादित्यनेन विरोधात्"। तस्मादाचूड़ान्तमित्यत्र चूड़ाशब्दस्तृतीयवर्षपर एव युक्तः तृतीयानन्तरमापञ्चमं गौणः ऊर्द्ध्वन्तु गौणोऽपि नेति स्थितम्"।

"यत्तु कात्यायनस्मरणम्। विक्रयञ्चैव दानञ्च न नेयाः स्युरनिच्छवः"। दाराः पुत्राश्च" इत्यनिच्छूनां दानादिनिषेधः सोऽपि पञ्चवार्षिकस्यैव नाधिकस्येति व्याख्येयम्। यच्च "सदृशन्तु प्रकुर्य्यात् यमिति" वाक्ये गुणदोषविचक्षणमिति पाठमभिप्रेत्य विचक्षणं न तु बालमिति सर्व्वज्ञेन व्याख्यातम् तदपि पञ्चवार्षिकमेव। विचक्षणं चातुर्य्यविशेषेण" न तु बालम् "बाल आ षोड़शाद्वर्षात्" इति लक्षणविशिष्टं न कुर्य्यादित्यर्थं इति व्याख्येयम्। नन्वसंस्कृताभावे कथमित आह गृहीत्वेति। पञ्चवर्षीयं चूड़ान्तसंस्कारसंस्कृतमित्यर्थः। ननु कथं तस्य ग्रहणं दासताभिधानादित्यत आह पुत्रेष्टिमिति। अयमत्राभिसन्धिः "अग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्व्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपालं प्रजाकामोऽग्निरेवास्मै प्रजां प्रजनयति वृद्धामिन्द्रः प्रयच्छतीति" वाक्ये प्रजाफलकत्वमिष्टेः श्रूयते तत्र यत्रानुत्पन्ना प्रजा तत्र तदुत्पत्तिरेव भाव्या यत्र तूत्पन्ना परिगृह्यते तत्रोत्पत्तेरभावात्तस्याः प्रजात्वमेव भाव्यमिति कल्प्यते प्रकृतविध्यन्यथानुपपत्तेः। तच्च दासत्वापनोदनमृते न सम्भवतीति तदपनोदोऽप्यवश्यमभ्युपेयः। अन्यथा प्रजात्वमात्रस्याकृते पुत्रपरिग्रहमात्रे स्यात्। यदि च संस्कारै-